Postal Regd.No. GAMC- 1553/2019-2021 ISSN 2454-6313

संस्कृत -

# साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १३ अङ्क : १५६
मे - २०१९

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### वातायने लम्बितं चारित्र्यम्

वृक्षवासी आदिमानवः कालक्रमेण गोयुगेन कृषिं प्रारभत । क्षेत्रगतं शस्यं रक्षितुं सः परितः वृतिं रचितवान्। ततः क्षेत्रं प्रवेष्टुं वृतौ लघु छिद्रम् अपि कृतवान्। अतीते काले परिवर्तनस्य चक्रे वर्धमाना एषा वृतिः इष्टकाचिता गृहभित्तिः अभवत्। तत्रापि चिरकालं छिद्रं न आसीत्। यतो हि पवनस्य गमनागमनं भित्तये न रोचते स्म। पवनेन विना खिन्नः मनुष्यः तत् वृतिगतं पुरातनं छिद्रं स्मृतवान्। सः भित्तौ लघु छिद्रं कृतवान्। एवं गृहे वातायनस्य जन्म अभवत्।

चैत्रमासस्य प्रभाते वातायनस्य उद्घाटनम् अपि किमपि आह्लादकं कर्म अस्ति । वातायनस्य उद्घाटनमात्रेण सुखस्पर्शः शीतलः पवनः अस्माकम् अनुज्ञां विना गृहं शीघ्रं प्रविशति । पवनेन सह किं किं प्रविशति ? पक्षिणां कलकलः प्रविशति.... भिक्षुकस्य श्रवणसुभगं गीतं प्रविशति... मन्दिरस्य घण्टानादः प्रविशति.... अनुवेशिनः गृहे पच्यमानस्य चायस्य सुगन्धः प्रविशति... क्वचित् प्रतिवेशिन्याः कालोचितं स्मितम् अपि प्रविशति। उद्घाटितं वातायनम् अनावृतं मनः अपेक्षते। तादृशं मनः अपरिचितं जनं परिचितं करोति। परिचयः अर्थात् स्नेहस्य मङ्गलाचरणम्।

प्रगतः मनुष्यः यदा वातायने जवनिकां स्थापितवान् तदा तस्य जीवने महती क्रान्तिः अभवत् । जवनिकायाः अनुशासने स्थितं वातायनं मनुष्यस्य सर्वविधां क्रियां गोपायति । कस्यापि चञ्चला दृष्टिः जवनिकायाः अनुज्ञां विना प्रवेष्टुं न शक्नोति। यद्यपि जवनिका वातायने महतीं भक्तिं धारयति, तथापि द्वयोः वैमनस्यं जायते तदा मनुष्यस्य चारित्र्यं संशयग्रस्तं भवति। यः मनुष्यः वातायनेन सह जवनिकां रक्षितुं जानाति सः समाजे भद्रः उच्यते। तस्य गृहे प्रवर्तमानम् अभद्रं चित्रं जवनिकायाः प्रमादेन यदा बहिः प्रसरति तदा लोकः वातायनस्य चारित्र्ये शङ्कां करोति। क्वचित् बकव्रतिनां कपटतापसानां वातायनं कश्चित् प्रभिन्नः नित्यसेवकः सहसा उद्घाटयति, तदा चिरकालात् प्रसुप्तस्य दम्भस्य अनावरणं भवति। वक्तुं शक्यते यत् मनुष्यस्य चारित्र्यं प्रायः वातायने लम्बितं भवति।

वृतिः –fence , जवनिका – curtain, वातायनम् – window

# महासाध्वी

जातककथा



ब्रह्मदत्तः यदा राज्यं परिपालयन् आसीत् तदा बोधिसत्त्वः काशीसमीपे स्थिते कस्मिंश्चित् सम्पन्नपरिवारे जन्म प्राप्तवान् आसीत्।

सः बाल्ये एव सर्वाः विद्याः अधीतवान् । यदा सः प्राप्तवयस्कः जातः तदा तदीयौ मातापितरौ काशीनगर्यां काञ्चित् कन्यां चित्वा तस्य विवाहं निर्वर्तितवन्तौ । तस्याः नाम सुजाता इति । सुजाता सुन्दरी, गुणवती, विवेकिनी च। सा पत्युः श्वश्रूश्वशुरयोः च सेवां श्रद्धया भक्त्या च करोति स्म।

सुजातायां विशेषानुरागः आसीत् बोधिसत्त्वस्य। कदाचित् सुजता पतिम् अवदत्- ''मम मातापितरौ वृद्धौ स्तः। तौ द्रष्टव्यौ इति मम मनसि तीव्रा इच्छा जायते एषु दिनेषु। अतः किम् आवां तौ दृष्ट्वा आगच्छाव ?''

सुजातायाः इच्छां ज्ञात्वा महता आनन्देन बोधिसत्त्वः अवदत्- ''तौ दृष्टव्यौ इति इच्छा मम मनसि अपि बहोः कालतः आसीत् । किन्तु गृहकार्याणि बहूनि आसन् इत्यतः मौनेन आसम् । तावता भवती एव इच्छां प्रकटितवती । भवतु ! अचिरात् एव आवां काशीं गत्वा आगच्छाव'' इति । अनन्तरदिने एव काशीं प्रति गमनाय सन्नाहः आरब्धः । आवश्यकानि वस्तूनि शकटे आरोप्य तौ काशीं प्रति प्रस्थितवन्तौ। बोधिसत्त्वः स्वयं शकटं चालयति स्म।''

यदा काशीनगरस्य सीमा प्राप्ता तदा कस्यचित् वृक्षस्य अधः शकटः स्थगितः । समीपस्थे कासारे हस्तपादादिकं प्रक्षाल्य तौ भोजनं कृतवन्तौ। किञ्चित्कालं यावत् विश्रान्तिसुखम् अनुभूय तौ प्रयाणम् अनुवर्तितवन्तौ।

यावत् तौ नगरं प्रविष्टवन्तौ तावता काशीराजः गजम् आरुह्य सपरिवारं नगरं प्रविष्टवान्। तदीयः गजः सम्यक् अलङ्कृतः आसीत्।

एतां यात्रां दृष्टुम् ऐच्छत् सुजाता। बोधिसत्त्वः एतत् अनुमतवान्। अतः सा शकटात् अवतीर्य पादाभ्यां मार्गे प्रस्थितवती। बोधिसत्त्वः तस्याः पृष्ठतः मन्दतया शकटं नयति स्म।

गजारूढः राजा परमसुन्दरीं सुजाताम् अपश्यत्। सुजाता परिणेतव्या इति इच्छा तस्य मनसि उत्पन्ना। तस्याः कुलगोत्रादिकं सः विचारितवान् । सा कस्य पुत्री इति तेन ज्ञातम् । तस्याः पृष्ठतः स्थितः एव तस्याः पतिः इत्यपि तेन ज्ञातम्।

सः अचिन्तयत् यत् केनचित् उपायेन एतस्याः पतिं मारयित्वा एषा मया परिणेतव्या इति। तदर्थं तेन काचित् कुटिला योजना अपि कृता।

सः विश्वासपात्रं कञ्चित् दूतम् आहूय तस्य हस्ते स्वस्य मुकुटं समर्प्य अवदत्- ''भवन्तः कथमपि उपायेन

एतं मुकुटं बोधिसत्त्वस्य शकटे स्थापयन्तु। किन्तु केनापि एतत् ज्ञातं न भवेत्" इति।

एतदनुगुणं सेवकाः मुकुटं बोधिसत्त्वस्य शकटे कथमपि स्थापितवन्तः। एतं विषयं राजानम् उक्तवन्तः च। ततः अल्पे एव काले वार्ता प्रसृता यत् राज्ञः मुकुटः केनापि चोरितः अस्ति इति। राज्ञः भटाः तस्य मुकुटस्य निमित्तं सर्वत्र अन्वेषणम् आरब्धवन्तः।

कश्चन भटः बोधिसत्त्वस्य शकटे अपि अन्वेषणम् अकरोत्। तत्र मुकुटः प्राप्तः। बोधिसत्त्वः एव चोरः इति वदन्तः भटाः तं बद्धवा राजसमीपं नीतवन्तः।

राजा तं दृष्ट्वा महता क्रोधेन आज्ञापितवान् – "राजमुकुटं चोरितवन्तम् एतं कारागारे स्थापयन्तु। अद्य एव एतस्य शिरश्छेदः भवतु" इति।

सेवकाः तं कशया प्रहरन्तः ततः नीतवन्तः। 'मम योजना सफला जाता' इति चिन्तयन् राजा नितरां सन्तुष्टः।

बोधिसत्त्वं प्रहरन्तः एव राजमार्गे नयन्तः भटाः तस्य अपमानं सम्यक् कृतवन्तः। ततः शिरश्छेदाय तं वधस्थानं प्रति नीतवन्तः ते।

एतां वार्तां श्रुतवती सुजाता रुदती पत्युः पृष्ठतः एव गतवती। 'मत्कारणतः एव भवतः एषा स्थितिः जाता' इति विलपनं कृतवती सा। वध्यस्थानम् अपि गतवती सा उच्चैः आक्रोशनं कृतवती – "किं निरपराधिनः रक्षणाय भगवान् अपि मतिं न करोति? दुष्टानाम् अत्याचारस्य किम् अन्त्यम् एव नास्ति?" इति।

साध्व्याः तस्याः विलपनम् इन्द्रेण अपि श्रुतम्। तस्मात् तस्य सिंहासनं कम्पमानं जातम्।

'एवं किमर्थं प्रवर्तते?' इति चिन्तयन् सः स्वस्य दिव्यदृष्ट्या सर्वम् अपि अवगतवान्। यत् अन्याय्यं प्रचलति तत् पूर्णतः अवगतं तेन।

सः स्वस्य सामर्थ्यम् उपयुज्य राज्ञः स्थाने बोधिसत्त्वं प्रतिष्ठापितवान्, बोधिसत्त्वस्य स्थाने राजा अतिष्ठत्।

इन्द्रेण कृतम् एतत् परिवर्तनं केनापि न ज्ञातम् एव। सिंहासने स्थितवान् राजा एव इति भावितवन्तः जनाः। एवमेव वधकः अपि अचिन्तयत् यत् मम पुरतः बोधिसत्त्वः एव अस्ति इति।

पुरतः स्थितस्य शिरः कर्तनीयम् इति राज्ञः आज्ञा आसीत् खलु? अतः वधकः एकेन एव खड्गप्रहारेण स्वस्य पुरतः स्थितस्य शिरः कर्तितवान्। तत्समनन्तरम् एव काशीराजस्य कलेवरेण वास्तविकं वेषभूषादिकं प्राप्तम् अभवत्। इदानीं जनाः ज्ञातवन्तः यत् राज्ञः एव शिरश्छेदः जातः अस्ति इति।

समग्रायां राजधान्यां कोलाहलः उत्पन्नः। एतस्याः अपूर्वघटनायाः कारणं कः इत्यत्र सर्वत्र चर्चा उत्पन्ना।

तदा इन्द्रः बोधिसत्त्वस्य जनानां च पुरतः प्रत्यक्षः जातः। प्रवृत्तं सर्वं निवेद्य सः जनान् उद्दिश्य – "इतः परं बोधिसत्त्वः एव भवतां राजा भविष्यति। एषा साध्वी सुजाता च पट्टमहिषी भविष्यति" इति उक्त्वा अदृश्यतां गतवान्।

'दुष्टस्य राज्ञः पापघटः पूर्णः आसीत्। अतः एव सः आत्मनः कुकृत्यस्य अनुरूपं फलं प्राप्तवान्' इति चिन्तयन्तः जनाः बोधिसत्त्वम् एव राजानं मतवन्तः। बोधिसत्त्वः सिंहासनम् अलङ्कृतवान्। सुजाता महाराज्ञी जाता।

तस्मात् दिनात् काशीराज्ये धर्मस्य शक्तिः प्रवृद्धा। जनाः सर्वे धर्माचरणपराः जाताः। काले वृष्टिः अपि जाता। देशश्च सुसमृद्धः जातः। तस्मात् सर्वे जनाः सुखेन जीवनम् आरब्धवन्तः।

# प्रातर्भ्रमणम्

डॉ. सुरेश्वरः झा

भ्रमणं कदापि प्रायः हानिकरम् न भवति। किन्तु प्रातःकालिकं भ्रमणं स्वास्थ्यस्य सम्वर्धनाय संरक्षणाय च अतिमहत्त्वपूर्णम् इति सर्वे विचारकाः स्वीकुर्वन्ति।

सूर्योदयात् अव्यवहितोत्तरसूर्योदयं यावत् (चतुर्विंशतिःवादनानि, त्रिंशत् मुहूर्ताःवा) एकः अहोरात्रः स्थूलतया दिवसो वाऽभिधीयते। तस्य दिनस्य प्रातः पूर्वाह्णः, मध्याह्नः, अपराह्ण, सायाह्नः, प्रदोषः, निशीथः इति वहवो विभागाः भवन्ति। तेषु सूर्योदय-समीपवर्ती, भूम्ना पूर्वतनः रात्र्यन्ते आकुक्कुटध्वनेः दिनभर्तुः वैभवारम्भकालः 'प्रातः' इत्यभिधीयते। भ्रमु अनवस्थाने (दि १०३) किम्वा - भ्रमुचलने (भ्वा. ५७५) इत्यतः ल्युटि सति भ्रमणम् इति भवति। इतस्ततो गमनम्, विहरणम् इति तस्यार्थः। ब्राह्मे मुहूर्ते समुत्थाय शौचान्निवृत्य गृहाद् बाह्ये स्थाने, वरम् उद्याने इतस्ततो विहरणं प्रातर्भ्रमणं कथ्यते।

स्वास्थ्यसंरक्षणाय व्यायामस्य अतितरां महत्त्वं कथ्यते। व्यायामश्च मल्लादीनां बहुविधो भवति। परन्तु व्यायामसन्दर्भे योगासनानां व्यवहारः भारते चिरकालात् वर्तते। पतञ्जलेः 'योगदर्शनम्' जगतीतले प्रधानतया चर्चाविषयः वर्तते। तस्य महत्त्वं किल कालातीतम्। किन्तु प्रातर्भ्रमणस्य यावान् सम्पूर्णो लाभः तावान् लाभः कस्मादपि एकस्मादासनात् न भवति। अतः योगासनानि महत्त्वपूर्णानि सन्तु नाम, प्रातर्भ्रमणेन सह तेषां न कोऽपि विरोधः। विविधरोगदूरीकरणाय योगासनानां यदि औषधिप्रायत्वं तदा प्रातर्भ्रमणस्य शक्तिवर्धकतत्त्व (विटामिन) रूपत्वं मन्तव्यम्।

यामिन्यां स्वल्पया महत्या वा मात्रया हिमपातात् वायुवृत्तीनि रजांसि भूमि परितानि भवन्ति। फलतः वायुः रात्रेः मानस्य वर्धनेन सह स्वच्छात् स्वच्छतरो भवन् अवसन्नप्राये रात्रिसमये स्वच्छतमो भवति। तादृशे मुहूर्ते उदेष्यतः सूर्यस्य प्रकाशस्य प्रभावाणां चतसृषु दिक्षु, विशेषतः पूर्वस्यां, प्रतीयमानतायां सत्यां भ्रमणे क्रियमाणे सति न केवलं हस्तपादाद्यवयवानां सञ्चालनेन व्यायाम-फल-लाभः, अपि तु स्वच्छतमे वायौ श्वास-प्रश्वास-ग्रहण-परित्यागाभ्याम् अपूर्वा शक्तिः लब्धा भवति। प्राणाः वस्तुतः पञ्च वायवः एव। अतः स्वच्छेन बाह्यवायुना प्राणानां कोऽपि विलक्षणः सम्बन्धः प्रतीयते। यतः स्वच्छवायोः श्वास-ग्रहणात् तादृशे वातावरणे अवस्थित्या कञ्चित् अधिकं कालं यावत् श्वासप्रक्रियया तादृशस्य निर्मलस्य वायोः ग्रहणात् प्राणशक्तिः दृढतरा अनुभूयते। जीवनी शक्तिः बलीयसी इव आकल्यते। समस्तेऽहनि आत्मकृत्येषु उत्साहः प्रतीयते। कुत्रापि गमनागमनयोः अदम्या स्फूर्तिः प्राप्यते इति सर्वम् एतत् अनुभवसिद्धम्, स्वयम्बोधगम्यम्।

अत एव हेतोः चिन्तकाः विद्वांसः अपरे च स्वास्थ्य-संरक्षण-कामाः जनाः प्रातर्भ्रमणं नियमतः कुर्वन्ति। विशेषतः पुष्पवाटिकासु विविध-पुष्प-पराग-वासित पवन-प्रदेशे भ्रमणेन अपूर्वं सुखं तात्कालिकम् अपि भवति, अग्रेऽपि च कतिपयकालं यावत् चेतः उत्साहसम्पन्नं तिष्ठति।

शरीरस्वास्थ्येन एव मनः-स्वास्थ्यम् अपि सम्बद्धम्। स्वस्थे शरीरे स्वस्था बुद्धिः तिष्ठति इति परिपक्वो विचारः। शरीरस्वास्थ्यसंरक्षणेन सर्वम् अन्यत् सुकृत्यं सम्बद्धम् इति 'शरीरमाद्यं खलु धर्मसाधनम्' इत्यनया कालिदासोक्त्या अपि सत्यापितं भवति।

वस्तुतः जीवलोकस्य सुखेषु अरोगिता अतिशयेन प्रधानं सुखं कथयितुं शक्यते। अस्वस्थतायां सत्यां किमपि महतो महत्तरं सुखसाधनम् स्त्रक्चन्दनवनितादिकं न कल्पते मुदे। प्रातर्भ्रमणेन स्वास्थ्यं संरक्षितं चेत् सर्वमेव सामान्यतः संरक्षितम् इति मन्तव्यम्।

# मासवार्ता

## आयोजितं व्याकरणशिबिरम् ।

एकलव्य-संस्कृत-एकेडेमी प्रतिवर्षं ग्रीष्मावकाशे व्याकरणशिबिरम् आयोजयति । शिबिरेऽस्मिन् नवमकक्ष्यायाः दशमकक्ष्यायाः च छात्राः संस्कृतव्याकरणं पठन्ति । छात्राः संस्कृतभाषायाः योग्यं मार्गदर्शनं प्राप्य संस्कृतभाषां सम्यक् जानीयुः, संस्कृतभाषां पठितुं तेषां हृदि रुचिः जागरिता च भवेत् इति अस्य व्याकरणशिबिरस्य आशयः वर्तते । 'देवदत्तः पयसा ओदनं भुङ्क्ते' इति स्मृत्वा एकलव्य-संस्कृत-एकेडेमीसंस्थानेन तादृशः अभ्यासक्रमः रचितः वर्तते यस्मिन् भागं गृहीत्वा गुणाङ्कान् इच्छन्तः छात्राः उत्तमान् गुणाङ्कान् प्राप्नुयुः सुन्दरं संस्कृतमपि पठेयुः । शिबिरमिदं मईमासस्य ६ दिनाङ्कात् २६ दिनाङ्कं यावत् प्रचलिष्यति ।

## सम्पन्नः 'Value Education through Sanskrit' बालसंस्कारकेन्द्रम् अभ्यासक्रमः ।





एकलव्य-संस्कृत-एकेडेमी Skg तः ८ कक्ष्यायाः बालकानां कृते 'Value Education through Sanskrit' बालसंस्कारकेन्द्रम् इति अभ्यासक्रमं सञ्चालयति । संस्कृतभाषायाः अध्ययनेन बालकानाम् उच्चारणशुद्धिः भवेत्, स्मरणशक्तेः विकासः भवेत्, तर्कशक्तेः विकासः भवेत्, बालानां सर्वाङ्गीणः विकासः च भवेत् इति अस्य अभ्यासक्रमस्य लक्ष्यं वर्तते । अभ्यासक्रमोऽयं सफलः । जुन २०१८ तः एप्रिल २०१९ पर्यन्तं सञ्चालितेऽस्मिन् अभ्यासक्रमे १०५ छात्राः संस्कृतम् अपठन् । अत्र उल्लेखनीयं यत् १६ जुन २०१९ तः नूतनस्य सत्रस्य आरम्भः भविष्यति ।

## कृपया हसन्तु

कश्चन पुरुषः गृहे उपविश्य चित्रसान्द्रमुद्रिकां (DVD) पश्यन् आसीत् । सहसा सः उच्चैः - “मा अवतर, मा अवरत । अश्वात् अधः मा अवतर । एतत् षड्यन्त्रम् अस्ति । महत् कष्टम् आपतिष्यति । पलायनं कुरु, इतः शीघ्रं पलायनं कुरु ।” इति उच्चैः अवदत् ।

एतत् श्रुत्वा पत्नी - “किं चलनचित्रं पश्यति भवान् ?” इति अपृच्छत् ।

“आवयोः विवाहस्य चित्रसान्द्रमुद्रिकां पश्यामि” इति पुरुषः अवदत् ।

★ ★ ★ ★ ★

रमणः - (नमनम् उद्दिश्य) किं भवान् स्वच्छताव्यवस्थापकः ?

नमनः - आम् । किं कार्यम् अस्ति ? वद ।

रमणः - मम गृहस्य पुरतः एकः गर्दभः मृतः अस्ति ।

नमनः - (रमणस्य उपहासं कुर्वन्) किं त्वं तस्य अन्तिमसंस्कारं कर्तुं न शक्नोषि ?

रमणः - निश्चयेन कर्तुं शक्नोमि । किन्तु मृतस्य सम्बन्धिनः सूचनीयाः इति विचिन्त्य अहं भवते दूरभाषं कृतवान् ।

★ ★ ★ ★ ★

पत्रालयविभागे पत्रवाहकस्य चयनार्थं काचित् परीक्षा आयोजिता आसीत् । तस्यां एकः प्रश्नः एतादृशः आसीत् यत् - “चन्द्रः पृथिव्याः कियत् दूरः वर्तते ?”

एतं प्रश्नं पठित्वा कश्चन परीक्षार्थी उत्तरम् अलिखत् - “यदि पत्राणि दातुं चन्द्रलोकं प्रति गन्तव्यम् अस्ति तर्हि अहम् एतां वृत्तिं (job) न इच्छामि ।”

## अहो चातुर्यम्

– संस्कृतविकिपिडीयाजालस्थानात्

**गन्धं सुवर्णे फलमिक्षुदण्डे नाकारि पुष्पं खलु चन्दनेषु ।**
**विद्वान् धनाढ्यो नृपतिश्चिरायुः धातुः पुरा कोऽपि न बुद्धिदोऽभूत् ॥**

ब्रह्मा उत्तमवर्णयुक्तम् अमूल्यं सुवर्णं सृष्टवान् । किन्तु तत्र सः गन्धं न योजितवान् । माधुर्ययुक्तम् इक्षुदण्डं सृष्टवान् सः तस्मिन् फलदानसामर्थ्यं न योजितवान् एव । सुगन्धयुक्तं चन्दनवृक्षं सृष्टवान् सः चन्दनवृक्षेषु पुष्पयोजनं विस्मृतवान् । पण्डितान् सृष्टवान् सः तेभ्यः धनानुकूल्यं न कल्पितवान् । सकलभोगसाधनानि राज्ञे दत्तवान् सः दीर्घायुष्यं न दत्तवान् एव । एवं सृष्टिकर्ता बहून् प्रमादान् कृतवान् । सृष्टिकाले योग्यः मार्गदर्शी कोऽपि ब्रह्मणः पार्श्वे न आसीत् यत् तस्यैव फलम् एतत् !

**का नाम बुद्धिहीनस्य विधेरस्य विदग्धता ।**
**कूष्माण्डेषु न यश्चक्रे तैलमूर्णं च दन्तिषु ॥**

ब्रह्मा सृष्टिकर्ता । किन्तु तस्य विवेकः न्यूनः इति भाति कदाचित् । सः तैलांशम् अल्पाकारेषु तिलेषु निक्षिप्तवान् । यदि सः एव तैलांशः तेन कूष्माण्डेषु निक्षिप्तः स्यात् तर्हि, अहो, कियत् तैलं प्राप्तम् अभविष्यत् ! महाकारकः गजः सृष्टः अस्ति तेन । किन्तु ऊर्णं तेन स्थापितं मेषेषु । यदि गजः ऊर्णवत्त्वेन सृष्टः स्यात् तर्हि महान् लाभः खलु अभविष्यत् ?

# ज्ञानसरिता

**सङ्गणकस्य बुद्धिमत्ता** – प्रसिद्धः गणितशास्त्रज्ञः एलेन् एम. टूरिङ्गवर्यः सङ्गणकानां बुद्धिमत्तायाः परीक्षणाय एकं क्रमं संशोधितवान् अस्ति। कश्चन पुरुषः आवृत्ते कोष्ठे स्थाप्यते। सः उच्यते च–'अन्यम् उद्दिश्य, सङ्गणकं च उद्दिश्य प्रश्नाः क्रियन्ताम्' इति। प्रकोष्ठस्यः प्रश्नकर्ता न जानाति यत् कः मानवः, किञ्च सङ्गणकम् इति। तेन प्रश्नानां द्वारा मानवसङ्गणकयोः अभिज्ञानं प्राप्तव्यम्। एषः परीक्षाक्रमः।

निर्दिष्टे काले यदि प्रश्नकर्ता मानवसङ्गणकयोः अभिज्ञानं प्राप्तुं न शक्नोति तर्हि सङ्गणकम् एव अधिकबुद्धिमत्तोपेतम् इति निर्णीयते। किन्तु अद्यावधि केनापि सङ्गणकयन्त्रेण एतस्यां परीक्षायाम् उत्तीर्णता न प्राप्ता। तादृशीम् उत्तीर्णतां प्राप्तुम् अर्हस्य सङ्गणकस्य निर्माणं कथम् इति प्रश्नः अद्यापि बाधते सङ्गणकविज्ञानिनः।

**अपूर्वसस्यं मेथिका** – मेथिका प्रायः सर्वैः अपि ज्ञायते एव। एतस्य लघुनः सस्यस्य पुष्पाणि श्वेतानि भवन्ति। एतस्य बीजकोशे १० – २० लघ्वाकाराणि धूसरवर्णोपेतानि उग्रगन्धयुक्तानि बीजानि भवन्ति। एषः उग्रगन्धयुक्तः बीजकोशः तिक्तरुचियुक्तः भवति। एतस्मिन् बीजकोषे जीवसत्त्वानि खनिजांशाः च अधिकप्रमाणेन भवन्ति। प्रोटिन-अंशः अपि अधिकप्रमाणेन भवति।

भारतीयपाके एतस्याः उपयोगः अधिकः। आयुर्वेदः अपि मेथिकायाः महत्त्वं विशेषतः विवृणोति।

– रक्तशर्करांशस्य न्यूनीकरणे एतस्याः विशेषसामर्थ्यम् अस्ति इत्यतः मधुमेहरोगचिकित्सायाम् एषा उपकारिका।

– एतस्याः पर्णानि जीर्णकारकाणि विशेषतः।

– एतस्याः नियतसेवनं रक्तहीनतायाः निवारकं भवितुम् अर्हति।

– एतस्याः पर्णैः निर्मितं लेप्यं व्रणजातां स्फीततां न्यूनीकर्तुम् अर्हति।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **शैलः** | पहाड़ | mountain |
| **शैलाली** | अभिनेता | actor |
| **शैशव** | बचपन | childhood |
| **शोण** | लाल | red |
| **शोथः** | सूजन | swelling |
| **शोफः** | रसोली | tumour |
| **शोषः** | सूखना | dryness |
| **शौक्ल्यम्** | सफेदी | whiteness |
| **शौभिकः** | मदारी | a juggler |
| **शौर्यम्** | वीरता | bravery |
| **श्मशानम्** | मरघट | a cemetery |
| **श्मश्रु** | दाढी-मूँछ | the beard and moustache |
| **श्यालः** | साला | wife's brother |
| **श्येनः** | बाज | a hawk |
| **श्रमणः** | बौद्धभिक्षु | Buddhist monk |

## किं भवन्तः जानन्ति ?

**१ ) एतेषु कः सुभद्रां हृतवान् ?**

(क) कर्णः (ख) अर्जुनः (ग) दुर्योधनः (घ) शिशुपालः

**२ ) लक्ष्म्याः वाहनं किम् अस्ति ?**

(क) शुकः (ख) गरुडः (ग) उलूकः (घ) हंसः

**३ ) विष्णोः वाहनं किम् अस्ति ?**

(क) मूषकः (ख) गरुडः (ग) हंसः (घ) सिंहः

**४ ) दुर्गायाः वाहनं किम् अस्ति ?**

(क) महिषी (ख) सिंहः (ग) गजः (घ) अश्वः

**५ ) अन्तिमे समये युधिष्ठिरस्य सहयोगः केन जीवेन कृतः आसीत् ?**

(क) नकुलेन (ख) श्वानेन (ग) सर्पेण (घ) शुकेन

**६ ) कार्तिकेयस्य वाहनं किम् अस्ति ?**

(क) हंस (ख) मयूरः (ग) गरुडः (घ) बकः

**७ ) शिवस्य वाहनं किं वर्तते ?**

(क) नन्दी (ख) गरुडः (ग) शुकः (घ) मूषकः

उत्तराणि – (१) ख (२) ग (३) ख (४) ख (५) ख (६) ख (७) क

# अस्माकम् आगामिकार्यक्रमाः

## Do you want to learn Sanskrit ? Here is a chance......

### Participate in Sanskrit Spoken Programme and learn Sanskrit

**Level 2**

**Date** : 19/07/19 to 30/10/19

**Day** : Mon-Wed-Fri

**Time** : 6.30pm to 8.00pm

**Fees** : 3000/-

- **Venue** : Eklavya Sanskrit Academy
- **Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## Admission Open

### Value Education Through Sanskrit

### बालसंस्कारकेन्द्रम्

**(Class SKg to 4)**

**Date** : 16/6/19 to 12/4/20

**Day** : Sunday

**Time** : 11.00am to 12.30pm

**Fees** : 4500/-

### बालसंस्कृतवर्गः

**(Class 5 to 8)**

**Date** : 16/6/19 to 12/4/20

**Day** : Sunday

**Time** : 11.00am to 12.30pm

**Fees** : 4500/-

**Venue:** Core House, Off CG Road, Ah'bad
**Contact :** Dr. Mihir Upadhyay - (91) 098246 16237

संस्कृत-
## साम्प्रतम्

नमस्कारः

यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006